**द्विस्तावा** स्त्री द्विर्द्विगुणिता तावती । "द्विस्तावा त्रिस्तावा वेदिः" पा० नि० । प्रकृतौ यावती वेदिः ततो द्विगुणायां वेद्यां सि० कौ० ।

**द्वि(द्विः)खिन्न** न० द्विवारं खिन्नं वृत्तौ सुजर्थे द्विशब्दः विसर्गयुक्तो तु सुजन्तः । द्विवारपक्वे तण्डुले (उसना चाउल) एकवारं धान्यावस्थायां तस्य खिन्नता द्वितीयवारं तण्डुलावस्थायामिति द्विःखिन्नत्वम् । द्वि(द्विः)खिन्नमन्नं पृथुकं शुद्धं देशविशेषके । नात्यन्तशस्तं विप्राणां भोजने च निवेदने । न भक्ष्यं तद्यतीनाञ्च विधवाब्रह्मचारिणाम् । ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम्" ब्रह्मवै० पु० ब्रह्मख० । हस्तिनि शब्दर० ।

**द्विहन्** पु० द्विर्हन्ति हन–क्विप् वृत्तौ सुजर्थे द्विशब्दः ।

**द्विहल्य** त्रि० हलस्य कर्षे यत् द्विवारं हल्यः । द्विवारं हलकृष्टक्षेत्रे (दोचसा भूमि) अमरः ।

**द्विहायन** त्रि० द्वौ हायनौ वयःकालो यस्य । १द्विवर्षे पश्वादौ स्त्रियां हायनान्तत्वात् ङीप् । "द्विहायनी द्विवर्षा गौः" अमरः । समाहारद्वि० । २वर्षद्वये न० पात्रा० न ङीप् । "शुक्लं द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम्" मनुः । द्विहायनं व्याप्य व्रतं कुर्य्यात् इत्यर्थः ।

**द्विहीन** त्रि० द्वाभ्यां स्त्रीपुंसाभ्यां हीनम् । क्लीवलिङ्गशब्दे "द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम्" अमरः ।

**द्विहृदया** स्त्री द्वे हृदये यस्याः । गर्भिण्याम् दोहदशब्दे ३७६८ पृ० दृश्यम् ।

**द्वीन्द्रियग्राह्य** त्रि० द्वाभ्यामिन्द्रियाभ्यां चक्षुषा त्वचा च ग्राह्यः उत्तरपदद्विगुः । "संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च । एते तु द्वीन्द्रियग्राह्याः" भाषा० उक्ते त्वक्चक्षुषोर्ग्रहणयोग्ये पदार्थे ।

**द्वीप** पु० न० अर्द्धर्चा० द्विर्गता द्वयोर्वा दिशोर्गता आपोऽत्र अच् समा० "द्व्यन्तरुपसर्गेभ्योऽप ईत्" पा० ईत् । जलमध्यस्थस्थलभेदे वारिवेष्टिते तटभेदे अन्तरीपे अमरः । भूम्यां प्रधानद्वीपाश्च नवैव तेषां नाम स्थानभेदाश्च सि० शि० उक्ता यथा "भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राहुराचार्य्यवर्य्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः । शाकं ततः शाल्मलमत्र कौशं क्रौञ्चञ्च गोमेदक पुष्करे च" । जम्बुद्वीपशब्दे ३०४३ पृ० दृश्यम् । "द्वीपान्तरानीतलवङ्गपुष्पम्" अन्येऽपि उपद्वीपा रमणकादयः सन्ति तेऽपि नव मिलिता अष्टादश । "अष्टादशद्वीपनिखातयूपः" रघुः "नवद्वयद्वीपपृथग्जयश्रियाम्" नैष० तोयोत्थिते २पुलिनमात्रे च द्वैपायनशब्दे दृश्यम् । "कूर्म्मग्राहझषाकीर्णां विपुलद्वीपशोभिताम्" भा० व० ६४अ० । लक्षणया द्वीपतुल्ये ३अवलम्बनस्थाने च । "वृकोदरः सव्यसाची यमौ च कोऽत्र द्वीपः स्यात्तुमुले वस्तदानीम्" भा० स० ६१अ० । "यश्चैषामभवत् द्वीपः कुन्तीपुत्रो वृकोदरः" भा० उ० ४८अ० । द्वौ वर्णौ ईयते ई–बा० पक् । ४व्याघ्रचर्म्मणि न० भरतः । तदस्यास्ति अच् । ५व्याघ्रे पु० । [ राजनि० ।

**द्वीपकर्पूर** पु० द्वीपस्य द्वीपान्तरस्य कर्पूरः । चीनकर्पूरे

**द्वीपखर्जूर** न० द्वीपस्य द्वीपान्तरस्य खर्जूरम् । महापारे राजनि० । [ राजनि० ।

**द्वीपज** न० द्वीपे द्वीपान्तरे जायते जन ड । महापारे

**द्वीपवती** स्त्री द्वीपोऽस्त्यस्याम् मतुप् मस्य वः ङीप् । १भूमौ २नद्याञ्च "अलङ्कृतं द्वीपवत्या मालिन्या रम्यतीरया" भा० आ० १६७ अ० । [ राजनि० ।

**द्वीप(पि)शत्रु** द्वी(पिनः)पस्य व्याघ्रस्य शत्रुरिव । शतावर्य्याम्

**द्वीपिका** स्त्री द्वीपः व्याघ्रः नाम्नतयाऽस्त्यस्याः ठन् । शतावर्य्याम् राजनि० ।

**द्वीपिन्** पु० द्वौ वर्णौ ईयते ईङ् गतौ बा० पक् द्वीपं चर्म तदस्यास्ति इनि । १व्याघ्रे (चिता वाघ) २चित्रके "सिंहद्वीपिरुरुव्याघ्रमहिषैश्च वृतैर्वृतम्" भा० व० ६४ अ० । व्याघ्रे "द्वीपिचर्मावृतकटीम्" तन्त्रम् ।

**द्वीपिनख** पु० द्वीपिनो नख इव । व्याघ्रनखे ।

**द्वीप्य** त्रि० द्वीपे जलान्तर्वर्त्तिनि स्थलभूमौ भवः यत् । १द्वीपभवे २रुद्रे पु० । "नादेयाय च द्वीप्याय च" यजु० १६।३१।

**द्वीश** त्रि० द्वौ ईशौ यस्य । १द्विदैवत्ये चर्वादौ २विशाखानक्षत्रे च तस्य इन्द्राग्निदेवताकत्वात् तथात्वम् ।

**द्वृ(द्वृ)च** पु० द्वे ऋचौ यत्र अ समा० । बा० वा सम्प्रसारणम् । ऋग्द्वययुतस्तुत्यात्ममन्त्रभेदे "कुषुम्भकस्तदब्रवीत् आवदंस्त्वं शकुने ! भद्रमावद, तूष्णीना जमदग्निना धामन्ते विश्वभुवनमधिश्रितं, गन्ता नो यज्ञं यज्ञियाः, सुशमियो नस्तो अरणः प्रचक्ष्व विचक्ष्वाग्ने या हि मरुत् सखायते राजन्कृतं हविरिति द्वृचाः" आश्व० गृ० ३।५।७ "एते नव द्वृचाः" नारा० "पतङ्गमक्तमसुरस्य मायया यो नः स नुत्यो अभिदासदग्ने भवानो अग्ने सुमना उपेताविति द्वृचाः" आश्व० श्रौ० ४।६।३ ।